# अथ स्वरनिर्णयः

सायणाचार्यविरचित सामविधान ब्राह्मणभाष्ये जगतस्सामोपजीवनं प्रायच्छदित्युक्तं कस्य कं भागं के उपजीवन्तीति जिज्ञासायान्तद्विविच्यदर्शयति । तद्योसौ क्रुष्टतम इवसाम्नः स्वरस्तं देवा उपजीवन्ति यो वरेषां प्रथमस्तं मनुष्या यो द्वितीयस्तं गन्धर्वाप्सरसो यस्तृतीयस्तं पशवोयश्चतुर्थस्तं पितरो ये चाण्डेषु शेरतेयः पञ्चमस्तमसुररक्षांसि योऽन्त्यस्तमोषधयो वनस्पतयो यच्चान्यज्जगदिति । अस्यायमर्थः । उपांशुव्यतिरिक्तासर्वावाक् मन्द्रमध्यमोत्तमभेदेन त्रिस्थाना भवति तत्र मन्द्रस्थानावाक् सप्तधा क्रुष्टादिसप्तस्वर रूपेत्यर्थः । क्रुष्टादय एवात्रोच्यन्ते ते चोत्तरोत्तरं नीचा भवन्ति एवं मध्यमोत्तमवचने अपिवाचौ वेदितव्ये । अमुमे वार्थं शौनक आह । पारिषदे । त्रीणिमन्द्रं मध्यममुत्तमञ्च स्थानान्याहुः सप्तयमानि वाचः । अनन्तरश्चात्र यमोवशिष्टः सप्तस्वरा ये यमास्ते पृथग्वेति । अनन्तरमित्यस्य वाक्यस्यायमर्थः येषु यमेष्वनन्तरो अव्यवहितो यमः सावशिष्टः अस्पष्टविशेष इत्यर्थः विप्रकृष्टो यमो भेदेन ज्ञातुं शक्यते न सन्निकृष्ट इति । तथा सप्तस्वरा इत्यस्यायमर्थः । ये यमा इत्युक्तास्सप्तते स्वराः षड्जादयः पृथग्वा क्रुष्टादयष्षड्जादिभ्योऽन्या एव बोद्धव्या इति एवंसतितत्तेषु क्रुष्टादिसंज्ञकेषु षड्जादिसप्तस्वरेषु मध्ये

योऽसौ साम्नः संबन्धी क्रुष्टतम इव इवेत्येवकारार्थे
अत्यनमुच्चस्वर एवास्ति गानकाले तं स्वरङ्गं
इन्द्रादय उपजीवन्ति तेन तृप्ता भवतीत्यर्थः ।
एवमुत्तरेष्वपि योज्यं यश्चावरेषामवशिष्टानां षण्णां
मद्ध्ये प्रथमो मुख्योस्ति तं मनुष्या उपजीवन्ति द्वितीयं
गन्धर्वाप्सिरसः गन्धर्वा अप्सरसश्च उपजीवन्ति तृतीयं
गवादिपशवः चतुर्थं पितरः किञ्च ये प्राणिनस्सर्वेषु
ब्रह्माण्डेषु शेरते निवसन्ति पञ्चमं स्वरमसुररक्षांसि
असुराश्च रक्षांसि च योऽन्त्यषष्ठस्वरः तमोषधयो
वनस्पतयश्च यच्चान्यदनुक्तञ्जगज्जातमस्ति तच्चेति ।
नारदीयशिक्षायाञ्च । दारवीगात्रवीणा च द्वे वीणे
गानजातिषु । सामिकीगात्रवीणा तु तस्याः शृणुत
लक्षणम् १ गात्रवीणा तु सा प्रोक्ता यस्यां गायन्ति
सामगाः । स्वरव्यञ्जनसंयुक्ता अङ्गुल्यां गुष्ठरञ्जिता
२ हस्तौ सुसंयुतौ धार्यौ जनुभ्यामुपरिस्थितौ ।
गुरोरनुकतिं कुर्याद्यथाज्ञानमतिर्भवेत् ३ प्रणवं प्राक्
प्रयुञ्जीत व्याहृती स्वदनन्तरं । सावित्रीञ्चानुवचनं
ततो वुत्तान्तमारभेत् ४ प्रसार्य चाङ्गुलीस्सर्वा रोपयेत्
स्वरमण्डलम् । न चाङ्गुलीभिरङ्गुष्ठमङ्गुष्ठेनाङ्गु
ली स्पृशेत् ५ विरलानाङ्गुलीः कुर्यान्मूले चैना
न संस्पृशेत् । अङ्गुष्ठाग्रेण तानि त्यं मद्ध्यमे
पर्वणि स्पृशेत् ६ मात्राद्विमात्रवृद्धानां विभागार्थं
विभागवित् । अङ्गुलीभिर्द्विमात्रं तु पाणौस्सव्यस्य
दर्शयेत् ७ त्रिरेखा यत्र दृश्येत संधिं तत्र विनिर्दिशेत् ।

सपर्व इति विज्ञेयः शेषमन्तरमन्तरम् ८ यवान्तरन्तु सामस्वृक्षु कुर्यात्तिलान्तरं । स्वरान्मद्ध्यमपर्वसु सुविनिष्टान्निवेशयेत् ६ न चात्र कम्पयेत् किञ्चिदङ्गस्यावयवं बुधः । अधस्तनं मृदुन्यस्य हस्तमात्रे यथा क्रमम् १० अभ्रमद्ध्ये यथा विद्युद्दृश्यते मणिसूत्रवत् । एषच्छन्दोविवृत्तीनां यथा वालेषु कर्तरि ११ कूर्म्मोऽङ्गानीव संहृत्य चेष्टां दृष्टिं दिशन्मनः । स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद्बुधः १२ नासिकायास्तु पूर्वेण हस्तं गोकर्णवद्धरेत् । निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत् १३ सममुच्चारयेद्वाक्यं हस्तेन च मुखेन च । यथैवोच्चारयेद्वर्णा स्तथैवैनान् त्समापयेत् १४ नात्याहन्यान्ननिर्हण्यान्नप्रगायेन्नकम्पयेत् । समं सामानि गायेत व्योम्नि श्येन गतिर्यथा । १५ यथाप्सुचरतां मार्गे मीनानान्नोपलभ्यते । आकाशे वा विहंगानान्तद्वत्स्वरगता श्रुतिः । १६ यथा दधि नि सर्पिः स्यात् काष्ठस्थो वा यथा नलः । प्रयत्ने नोपलभ्येत तद्वत्स्वरगताश्रुतिः १७ स्वरात्स्वरं संक्रमं स्तुस्वरसंधि मनुल्बणम् । अविच्छिन्नं समं कुर्यात्सूक्ष्मं छाया तपोपमम् । १८ अनागतमतिक्रान्तं विच्छिन्नं विषमाहतम् । तवन्तमस्थितां तञ्च वर्जयेत्कर्षणं बुधः १९ स्वरस्थानाच्च्युतो यस्तु स्वं स्थानमतिवर्तते । विस्वरं सामगाब्रूयुर्विरक्तमिति वीणिनः २० अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु

मध्यमां । शिष्याणामुपदेशार्थे कुर्याद्वृत्तिं विलम्बितां
। २१ गृहीतग्रन्थ एवन्तु ग्रन्थोच्चारणशिक्षकान् ।
हस्तेनाद्ध्यापयेच्छिष्यां छैक्षेण विधिना द्विजः २२
खण्डः ४
क्रुष्टस्य मूर्द्धनिस्थानं ललाटे प्रथमस्य तु ।
भ्रुवोर्मद्ध्ये द्वितीयस्य तृतीयस्य तु कर्णयोः १
कण्ठस्थानञ्चतुर्थस्य मन्द्रस्योरसितूच्यते ।
अतिस्वारस्य नीचस्य हृदिस्थानं विधीयते २
अङ्गुष्ठस्योत्तमे क्रुष्टोऽङ्गुष्ठे प्रथमः स्वरः ।
प्रदेशिन्यान्तु गान्धार ऋषभस्तदनन्तरम् ३
अनामिकायां षड्जस्तु कनिष्ठायान्तु धैवतः ।
तस्याधस्ताच्च योन्यस्तु निषादन्तत्र विन्यसेत् ४
अपर्वत्वादसंज्ञत्वादव्ययत्वाच्च नित्यशः ।
मन्द्रोहिनुहिभूतस्तु परिस्वार इति स्मृतः ५ क्रुष्टेन
देवाजीवन्ति प्रथमे न तु मानुषाः । पशवस्तु
द्वितीयेन गन्धर्वाप्सरसस्तनु ६ अण्डजाः
पितरश्चैव चतुर्थः स्वरजीविनः । मन्द्रं ते
वोपजीवन्ति पिशाचासुरराक्षसाः ७ अतिस्वारेण
नीचेन जगस्थावरजंगमं सर्वाणि खलु भूतानि
धार्यन्ते सामकैः स्वैरैः ८ दीप्तायता करुणा ।
नांमृदुमध्यमयोस्तथा । श्रुतीनां योऽविशेषज्ञो न स
आचार्य उच्यते ९ लौकिके ये निषादादयः सप्तस्वराः
प्रसिद्धास्त एव साम्नि क्रुष्टादि सप्तस्वराभवन्ति ।
तद्यथा । यो निषादस्सक्रुष्टः । धैवतः प्रथमः ।

पञ्चमो द्वितीयः । मद्ध्यमस्तृतीयः । गान्धारश्चतुर्थः।
ऋषभोमन्द्रः । षड्जोऽतिस्वार्यः ।
अतः क्रुष्टादयस्सप्तस्वरा उत्तरोत्तरं नीचाभवन्ति ।
अथ स्वरांकाः ११ अयमंकः क्रुष्टस्य १ अयं
प्रथमस्य २ अयं द्वितीयस्य ३ अयं तृतीयस्य ४
अयं चतुर्थस्य ५ अयं मन्द्रस्य ६ अयमतिस्वार्यस्य
६५६ अयं परिस्वार्यस्य । अकारो अभिगीतस्य
नकारो नमनस्य च । विकारो विनतस्य । अयं
प्रेंखणस्य । ० । अयं द्विमात्रिकस्य १ अयं
दीप्तायाः २ अयमायतायाः । अयं करुणायाः ।
इति स्वरांकाः
अथ स्वरविन्यासः । तर्जन्या उपरिद्वियवान्तरोऽङ्गुष्ठः
क्रुष्टस्य बोधकः । एकयवान्तरोऽङ्गुष्ठः प्रथमस्य ।
तर्जनी मध्यरेखा द्वितीयस्य । मध्यमा
मध्यरेखा तृतीयस्य । अनामिका मध्यरेखा
चतुर्थस्य। कनिष्ठिका मध्यरेखा मन्द्रस्य ।
तन्मूलरेखातिस्वार्यस्य ।

इति स्वरविन्यासः

Reference:
“Svara-nirṇaya,” in Krishnaswami Srauti, ed. *Chhalaprakriyādayo*, Kumbakonam: Jyotirvilasa Press, 1885.